संस्कृतवार्ता:

दिनाङ्क: 31.05.2026

प्रात: - 06:55

प्रधानमन्त्री/'मन की बात'-कार्यक्रमः

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रातः एकादश वादने आकाशवाणीतः 'मन की बात' इति कार्यक्रमे स्वीयं मनोगतं प्रकटयिष्यति। मासिकस्य आकाशवाणी-कार्यक्रमस्य एतत् चतु:त्रिंशदधिक‍ै-शत-तमं संस्करणं भविष्यति। आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनीभिः अस्य कार्यक्रमस्य प्रसारणं भविष्यति। अयं हि आकाशवाणी-वार्ता-

विभागस्य अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अपि च newsonair इति चल-दूरभाषीये तन्त्रांशे अपि उपलब्धः भविष्यति। आकाशवाणी-दूरदर्शन-प्रधानमन्त्रिकार्यालय-सूचनाप्रसारण-

कार्यालयानां यूट्यूब- वाहिनीभिः अपि अस्य कार्यक्रमस्य साक्षात्-

प्रसारणं भविष्यति।हिन्दीभाषायां प्रसारणस्य अनन्तरम् आकाशवाण्याम् अस्य प्रसारणं क्षेत्रीयासु भाषासु अपि भविष्यति।

विदेशमन्त्री डा. एस्. जयशङ्करः

विदेशमन्त्री डा. एस्. जयशङ्करः गतसायं म्यान्मार-देशस्य राष्ट्रपतिना यू मिन आङ्ग ह्लाईङ्ग इत्यनेन सह मिलितवान्। सामाजिकान्तर्जालीये पटले डा. जयशङ्करः दीर्घकालं यावत् द्वैपाक्षिकं सहकारं सुदृढं कर्तुं म्यान्मार-देशस्य राष्ट्रपतेः सकारात्मक-भावस्य प्रशंसाम् अकरोत्। सः अवदत्

यत् सः शान्तेः, प्रगतेः, समृद्धेः च सहभागित्वं इतोपि सुदृढं कर्तुं प्रधानमन्त्रिणा नरेन्द्रमोदिना सह श्रीह्लाईङ्ग वर्यस्य मेलनस्य प्रतीक्षायाम् अस्ति। उभयो: देशयोः मध्ये ऐतिहासिकानां सभ्यतानां च सम्बन्धान् दृढीकरणाय राष्ट्रपतिः श्वः प्रधानमन्त्रिणा मोदिना सह चर्चिष्यति। पूर्वं ह्यः म्यान्मार्-देशस्य राष्ट्रपतिः बिहारस्य गयायां गत्वा महाबोधि-मन्दिरे प्रार्थनां कृतवान्। अवधेयं यत् राष्ट्रपतिः ह्लाईङ्गः पञ्चदिवसीय-भारतयात्रायाम् अस्ति।

## दिल्ल्यारक्षि-बलम्

दिल्ल्यारक्षि-बलस्य विशेष-प्रकोष्ठेन पाक-आई.एस.आई-मुम्बई-अण्डर्-वर्ल्ड्-जालेत्यस्य आदेशेन कार्यं कुर्वन्तः अष्टौ अभियुक्ताः निगडिताः। वार्ताहरान् सम्बोधयन् दिल्ल्यारक्षि-बलस्य विशेष-प्रकोष्ठस्य विशेष-सी.पी. अनिल-शुक्लः अवदत् यत् अभियुक्ताः दिल्ली-नगरस्य महत्त्वपूर्ण-स्थानेषु सुरक्षाकर्मचारिषु च आक्रमणं कर्तुं नियुक्ताः आसन्। सः अवदत् यत् तैः सह शस्त्राणि विस्फोटकानि च प्राप्तानि सन्ति। श्री शुक्लः सूचितवान् यत् अभियुक्ताः सीमापार-निर्वाहकानां निर्देशानुसारं कार्यं कुर्वन्तः आसन्, ते दिल्ली-महाराष्ट्र-पुणे-नगरेभ्यः निगडिताः।

## बैडमिंटन्

बैडमिण्टन् क्रीडायां सिंगापुर ओपन टूर्नामेंट इति स्पर्धायां भारतस्य सात्विक सांईराज रंकी रेड्डी, चिराग शैट्टी इत्यनयो: युगलं निर्णायकचक्रे प्रविष्टम्। उपान्त्यचक्रे भारतीय दलेन दक्षिण कोरिया दलं पराजितम्।

## महिला क्रिकेट्

महिलानाम् अन्ताराष्ट्रिय विंशतिम् प्रतिविंशतिः द्वितीया-क्रिकेट-क्रीडायां भारत इङ्ग्लैण्ड-दलयोः मध्ये गतसायं जातायां स्पर्धायां इङ्ग्लैण्ड-दलेन भारतं षड्विंशति धावनांकै: पराजितम्।

आई. पी. एल

आई. पी. एल. क्रिकेट्-क्रीडायां, गुजरात टाइटन्स दलम् अद्य अहमदाबादस्य नरेन्द्र मोदी-क्रीडाङ्गणे निर्णायक-स्पर्धायां रॉयल चैलेंजर्स बेंगलुरु दलेन सह स्पर्धिष्यति। स्पर्धाया: आरंभ: सायं सार्ध सप्तवादने भविष्यति।

संस्कृत - साप्ताहिकी

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः अद्य रविवासरे मध्याह्ने सार्धैक-वादनतः भविष्यति, भवन्तः सर्वे श्रोतुं प्रभवन्ति।